# शब्दविमर्शः - रप्रत्ययान्तशब्दानामवलोकनम्।

## 2. कम्प्रः।

सर्वगुणसम्पन्नमपि तमनागसं लक्ष्मणं शपते सीता। क्व शपते। एवं खलु रामायणकथा यद्रावणाज्ञया मायामयो मृगो भूत्वा मारीचो सीताया मनः प्रलोभयितुं निश्चकार। येन रामः सीतायै मृगमानेतुं प्रतिष्ठेत। तस्मिन्समये कथञ्चिल्लक्ष्मणपि ततोऽपवार्य सीतापनेतव्येति गूढोऽस्य भावः। तत्तथैव समपद्यत। रामबाणविद्धस्तां कृत्रिमां तनुं जहौ। स्वरूपमास्थाय लक्ष्मणं सितायाः रक्षणे नियुक्तं ततोऽपसारयितुं 'स प्राप्तकालमाज्ञाय चकार च ततः स्वनम्। सदृशं राघवस्येव हा सीते लक्ष्मणेति च।' (रामायणम् 3.44.19)।

वने तमार्तस्वरं भर्तुः सदृशं विज्ञाय त्वरितं गत्वा राघवं जानीहीति सीता लक्ष्मणमुवाच। किन्तु लक्ष्मणो न जगाम। यतो ह्यसौ रामेणादिष्टोऽस्ति सीतापरिरक्षणाय। एतेन क्षुभिता जनकनन्दिनी 'सौमित्रे मित्ररूपेण भ्रातुस्त्वमसि शत्रुवत्। यस्त्वमस्यामवस्थायां भ्रातरं नाभिपद्यसे। इच्छसि त्वं विनश्यन्तं रामं लक्ष्मण मत्कृते।' (रामायणम् 3.45.5-6) इति कर्णकठोरं चुक्रोश। एवं ब्रुवाणां बाष्पशोकसमन्वितां त्रस्तामवेक्ष्य वैदेहीं लक्ष्मणोऽब्रवीत् यत्पन्नगासुरगन्धर्व देवदानवराक्षसैः तव भर्त्ता जेतुमशक्य इति। किन्तु ता वाचस्तां परिसान्त्वयितुन्नाशक्नुवन्। प्रत्युत क्रुद्धा संरक्तलोचना चासौ सत्यवादिनं लक्ष्मणं भूयोऽप्यभर्त्सयत। 'अनार्याकरुणारम्भ नृशंस कुलपांसन। अहं तव प्रियं मन्ये रामस्य व्यसनं महत्। रामस्य व्यसनं दृष्ट्वा तेनैतानि प्रभाषसे' (रामायणम् 3.45.22)। नैव चित्रं सपत्नेषु पापं लक्ष्मण यद् भवेदित्यादि सीतया रोमहर्षणं परुषं वाक्यमुक्तोऽपि महात्मा विजितेन्द्रियो लक्ष्मणः प्राञ्जलिः सीतामुवाच। 'उत्तरं नोत्सहे वक्तुं दैवतं भवती मम। वक्यमप्रतिरूपं तु न चित्रं स्त्रीषु मैथिलि। किञ्च 'विमुक्तधर्माश्चपलास्तीक्ष्णा भेदकराः स्त्रियः। स्वभावस्त्वेष नारीणामेषु लोकेषु दृश्यते' इत्यात्मगतमिवाथवात्मानमेव परिसान्त्वयन्निव वनदेवतास्तद्रक्षणार्थं सम्प्रार्थ्य 'तामार्तरूपां विमना रुदन्तीं सौमित्रिरालोक्य विशालनेत्राम्। ततस्तु सीतामभिवाद्य लक्ष्मणः कृताञ्जलिः किञ्चिदभिप्रणम्य। अवेक्षमाणो बहुशः स मैथिलीं जगाम रामस्य समीपमात्मवान्। (रामायणम् 3.45.28-29, 39-40)।

भट्टिकाव्ये सीतान्वेषणं नाम सप्तमः सर्गः। मध्येऽयं सन्देहः को वा वाल्मीके रामायणस्य तदाधारेण लिखितस्यास्य काव्यस्य च भेद इति। न खलु तावान् भेदः। रामायणस्यैव सारस्ततः सारभूता अंशाः सर्वत्रोपलभ्यन्ते। रामायणवद्विशङ्कटो नेत्यतः घटनाः एकैकशो नोपलभ्यन्ते। तावानेव भेदः। एवं वर्णनासिद्धये कथाबहिर्भूता अप्यंशास्तत्र तत्र सन्निवेशिताः कालिदासादिभिरिव। यथा शाकुन्तले अभिज्ञानाङ्कुलीयकस्य कल्पना कविकृता न पुनर्महाभारत उपलभामहे। तदस्तु पूर्वोक्तं सप्तमं सर्गमुपसरेम। 'तं जागरूकः कार्येषु दन्दशूकरिपुं कपिः। अकम्प्रं मारुतिर्दीप्रं नम्रः प्रावेशयद् गुहाम्।।' (7.23)। कीदृग्लक्ष्मणमिति चेद्दन्दशूकरिपुं हिंस्रारिम्। दीप्रं साधु दीप्यमानम्। अकम्प्रम् अकम्पनशीलं अभीरुमित्यर्थः। तं लक्ष्मणं कार्येषु  कृत्येषु जागरूकः। नम्रः साधु प्रह्वीभूतः। कपिर्मारुतिः गुहां प्रावेशयत्।

अकम्प्रशब्दोऽत्र विशेषेण विवक्षितः। कम्प्रशब्दस्य नञा समासः। तच्छीलतद्धर्मतत्साधुकारिष्वर्थेषु प्रत्ययस्य विधानादिह प्रसङ्गे ताच्छीलिकेऽर्थे विहितः। चलनं कम्पनं कम्प्रमित्यमरः। सन्त्यन्यावप्यस्मिन् श्लोके रप्रत्ययान्तौ शब्दौ नम्रदीप्रौ। तयोः नम्रशब्दः प्राक्तनोपन्यासे प्रपञ्चितः। दीप्रशब्दविषयेऽग्रे विशदं वक्ष्यते। सर्वत्र कपि चलने (भ्वा.375) इत्यस्माद्धातोः 'नमिकम्पिस्म्यजसकमहिंसदीपो रः' (3.2.167) इति रः।

एवमन्यत्र भट्टिकाव्ये 'विभीषणोक्तं बहु मन्यमानः प्रोन्नम्य देहं परिणामनम्रम्। स्खलद्वलिर्वार्धककम्प्रमूर्धा मातामहो रावणमित्युवाच।।' (12.55)। धार्मिकविचारविचक्षणस्य विभीषणस्य वचः बहु मन्यमानः = श्लाघमानो मातामहो माल्यवान् देहं परिणामनम्रं = वयसः परिणामान्नमनशीलं प्रोन्नम्योक्षिप्य। अत एव स्खलद्वलिः। वार्धकेन = वृद्धभावेन कम्प्रः कम्पनशीलो मूर्धा यस्य सः रावणमिति = वक्ष्यमाणमुवाच। इतीत्यस्य वक्ष्यमाणमिति कथमर्थ उपपन्न इति चेत्प्रकारवचन इति शब्दः। इति हेतुप्रकरणप्रकाशादिसमाप्तिष्वित्यमरः। नम्रशब्दः प्राक्तनोपन्यासे वर्णितः। कम्प्रशब्दार्थमिदमिदानीमुपात्तम्।

कुमारसम्भवे कैलासगमनं नाम्नि नवमे सर्गे हरविहारं वर्णयन् कालिदासः 'मन्देन खिन्नाङ्गुलिना करेण कम्प्रेण तस्या वदनारविन्दात्। परामृशन्घर्मजलं जहार हरः सहेलं व्यजनानिलेन।।' (9.20)। हरः शिवः। लघुप्रचारेण तथा अलसप्रयोगेणोदासीनाङ्गुलिना तथा कम्प्रेण = कम्पनशीलेन करेण तस्याः पार्वत्या वदनारविन्दाद्धर्मस्य घर्मरूपं वा जलं परामृशन्विश्लेषयन्सहेलं सक्रीडं यथा तथा व्यजनस्यानिलेन जहार। प्राग्वदत्रापि 'नमिकम्पिस्म्यजसकमहिंसदीपो रः' (3.2.167) इति रः।

शिशुपालवधस्य द्वादशे सर्गे श्रीकृष्णादीनां पुनः प्रयाणवर्णनं यमुनावर्णनञ्च कुर्वन् माघः ‘व्यावृत्तवक्त्रैरखिलैश्चमूचरैर्व्रजद्भिरेव क्षणमीक्षिताननाः। वल्गद्गरीयः स्तनकम्प्रकञ्चुकं ययुस्तुरंगाधिरुहोऽवरोधिकाः।।’ (12.20)। व्यावृत्तवक्त्रैर्विवृत्तमुखैः व्रजद्भिरेवाखिलैः चमूचरैः क्षणमीक्षिताननाः तुरङ्गाधिरुहः अवरोधस्त्रियो वल्गद्भिश्चलद्भिः गरीयोभिर्गुरुतरैः स्तनैः कम्प्रः कम्पनशीलः कञ्चुकः कूर्पासो यस्मिन्कर्मणि तद्यथा तथा ययुरित्यर्थः। प्राग्वद् रप्रत्ययः।

एवं नैषधे कश्चन चारुतरः प्रसङ्गः यस्मिन्नादौ कथं दमयन्तीदत्तचित्तमुपकुर्वाणस्य राजहंसस्यावाप्तिर्नलस्येति वर्ण यति श्रीहर्षो श्रिया हरिं योजयतां देवानामिव हर्षमावहन्स्वकाव्याध्येतॄणाम्। तेवनेन वने चरता अवनीभुजा नलेन मन्थनात् भयेन चिरादुच्चितं स्वं चिरत्नरत्नाधिकमादाय तस्मिन् वने निलीय निवसन्नपां निधिरिव तडागो ददृशे। तत्र रतिक्लमालसः कश्चिद्धंसः एकपादिकां प्रबलस्य तिर्यगावर्जितकन्धरः भूत्वा पक्षेण शिरः पिधाय उपपल्वलं क्षणं निदद्रौ। तदा नलः स्वयं कपटेन बलिध्वंसिविडम्बिनीं वामनीं मूर्तिं विधाय मौनिना चरणेन उपेतपाश्र्वः पाणिना पतङ्गं समधत्त। सः खगः कारुण्यरसापगाः गिरः तं नृपं सचित्रवैलक्ष्यकृतं विरचय्य दयासमुद्रे तदाशये अतिथीचकार। कथंविधो वाङ्मयः येन नृपः दयासमुद्रेऽवगाहितः इत्युदाहरति ‘सुताः कमाहूय चिराय चूङ्कृतैर्वि धाय कम्प्राणि मुखानि कं प्रति। कथासु शिष्यध्वमिति प्रमील्य सः सुतस्य सेकाद् बुबुधे नृपाश्रुणः।।’ (नैषधम् 1.142)। सुताः चूङ्कृतैः चिराय कमाहूय कं प्रति मुखानि कम्प्राणि विधाय कथासु शिष्यध्वम् इति सकरुणं विलपन् प्रमील्य = मूर्छितः सः सुतस्य नृपाश्रुणः सेकात् बुबुधे। नलनेत्राद्दयासमुद्रः प्रावहदित्यर्थः। ततः किमकरोद्राजा। नायं हिंस्रो नलः। ततः इत्थं विलपन्तममुं दीनदयालुतया अवनिपालः ‘रूपमदर्शि यदर्थं धृतोऽसि’ इत्यभिधाय अमुञ्चत्। कम्प्रशब्दस्य प्रयोगान्तरदर्शनायायं कथालापः। अये किमवादीत् ‘नायं हिंस्रो नल’ इति। कोऽत्र विशेषः। हिंस्रशब्दे विशेषः। अयमपि कश्चिद्रप्रत्ययान्तः यस्य चर्चा कदाचिदग्रे करिष्यते।

***